# श्रीमद्-भगवद्-गीता *Śrīmad-Bha-ga-vad-Gī-tā*

## *Chapter 9 Verses 1 - 17*

| | |
|---|---|
| ॐ हरिः ॐ | *om hariḥ om* |
| श्री गुरुभ्यो नमः | *śrī gu-ru-bhyo na-maḥ* |
| हरिः ॐ | *hariḥ om* |
| ॐ श्री कृष्णपरमात्मने नमः | *om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne namaḥ* |
| श्रीमद्-भगवद्-गीता | *śrīmad-bha-ga-vad-gī-tā* |
| अथ नवमोऽध्यायः । | *a-tha na-va-mo-'dhyā-yaḥ* \| |
| राजविद्याराजगुह्ययोगः । | *rā-ja-vid-yā-rā-ja-guh-ya-yo-gaḥ* \| |

| | |
|---|---|
| श्रीभगवानुवाच । | *śrī-bha-ga-vān-u-vā-ca* \| |
| इदं तु ते गुह्यतमं | *i-daṁ tu te guh-ya-ta-maṁ* |
| प्रवक्ष्याम्यनसूयवे । | *pra-vak-ṣyām-ya-na-sū-ya-ve* \| |
| ज्ञानं विज्ञानसहितं | *jñā-naṁ vi-jñā-na-sa-hi-taṁ* |
| यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ ९-१ ॥ | *yaj-jñāt-vā mokṣ-ya-se'-śu-bhāt* \|\| 9-1 \|\| |

राजविद्या राजगुह्यं | *rā-ja-vid-yā rā-ja-guh-yaṁ*
पवित्रमिदमुत्तमम् । | *pa-vi-tram-i-dam-ut-ta-mam* |
प्रत्यक्षावगमं धर्म्यं | *prat-yak-ṣā-va-ga-maṁ dharm-yaṁ*
सुसुखं कर्तुमव्ययम् ॥ ९-२ ॥ | *su-su-khaṁ kar-tum-av-ya-yam* || 9-2 ||

अश्रद्दधानाः पुरुषाः | *a-śrad-da-dhā-nāḥ pu-ru-ṣāḥ*
धर्मस्यास्य परन्तप । | *dhar-mas-yās-ya pa-ran-ta-pa* |
अप्राप्य मां निवर्तन्ते | *a-prāp-ya māṁ ni-var-tan-te*
मृत्युसंसारवर्त्मनि ॥ ९-३ ॥ | *mṛt-yu-saṁ-sā-ra-vart-ma-ni* || 9-3 ||

मया ततमिदं सर्वं | *ma-yā ta-tam-i-daṁ sar-vaṁ*
जगदव्यक्तमूर्तिना । | *ja-gad-av-yak-ta-mūr-ti-nā* |
मत्स्थानि सर्वभूतानि | *mat-sthā-ni sar-va-bhū-tā-ni*
न चाहं तेष्ववस्थितः ॥ ९-४ ॥ | *na cā-haṁ teṣ-va-vas-thi-taḥ* || 9-4 ||

| | |
|---|---|
| न च मत्स्थानि भूतानि | *na ca mat-sthā-ni bhū-tā-ni* |
| पश्य मे योगमैश्वरम् । | *paś-ya me yo-gam-aiś-va-ram* \| |
| भूतभृन्न च भूतस्थः | *bhū-ta-bhṛn-na ca bhū-tas-thaḥ* |
| ममात्मा भूतभावनः ॥ ९-५ ॥ | *ma-māt-mā bhū-ta-bhā-va-naḥ* \|\| 9-5 \|\| |
| यथाकाशस्थितो नित्यं | *ya-thā-kā-śa-sthi-to nit-yaṁ* |
| वायुः सर्वत्रगो महान् । | *vā-yuḥ sar-va-tra-go ma-hān* \| |
| तथा सर्वाणि भूतानि | *ta-thā sar-vā-ṇi bhū-tā-ni* |
| मत्स्थानीत्युपधारय ॥ ९-६ ॥ | *mat-sthā-nīt-yu-pa-dhā-ra-ya* \|\| 9-6 \|\| |
| सर्वभूतानि कौन्तेय | *sar-va-bhū-tā-ni kaun-te-ya* |
| प्रकृतिं यान्ति मामिकाम् । | *pra-kṛ-tiṁ yān-ti mā-mi-kām* \| |
| कल्पक्षये पुनस्तानि | *kal-pak-ṣa-ye pu-nas-tā-ni* |
| कल्पादौ विसृजाम्यहम् ॥ ९-७ ॥ | *kal-pā-dau vi-sṛ-jām-ya-ham* \|\| 9-7 \|\| |

| | |
|---|---|
| प्रकृतिं स्वामवष्टभ्य | *pra-kṛ-tiṁ svām-a-vaṣ-ṭabh-ya* |
| विसृजामि पुनः पुनः । | *vi-sṛ-jā-mi pu-naḥ pu-naḥ* । |
| भूतग्राममिमं कृत्स्नम् | *bhū-ta-grā-mam-i-maṁ kṛt-snam* |
| अवशं प्रकृतेर्वशात् ॥ ९-८ ॥ | *a-va-śaṁ pra-kṛ-ter-va-śāt* \|\| 9-8 \|\| |
| न च मां तानि कर्माणि | *na ca māṁ tā-ni kar-mā-ṇi* |
| निबध्नन्ति धनञ्जय । | *ni-badh-nan-ti dha-nañ-ja-ya* । |
| उदासीनवदासीनम् | *u-dā-sī-na-va-dā-sī-nam* |
| असक्तं तेषु कर्मसु ॥ ९-९ ॥ | *a-sak-taṁ te-ṣu kar-ma-su* \|\| 9-9 \|\| |
| मयाध्यक्षेण प्रकृतिः | *ma-yā-dhya-kṣe-ṇa pra-kṛ-tiḥ* |
| सूयते सचराचरम् । | *sū-ya-te sa-ca-rā-ca-ram* । |
| हेतुनानेन कौन्तेय | *he-tu-nā-ne-na kaun-te-ya* |
| जगद्विपरिवर्तते ॥ ९-१० ॥ | *ja-gad-vi-pa-ri-var-ta-te* \|\| 9-10 \|\| |

| | |
|---|---|
| अवजानन्ति मां मूढाः | *a-va-jā-nan-ti  māṁ  mū-ḍhāḥ* |
| मानुषीं तनुमाश्रितम् । | *mā-nu-ṣīṁ  ta-nu-mā-śri-tam* \| |
| परं भावमजानन्तः | *pa-raṁ  bhā-vam-a-jā-nan-taḥ* |
| मम भूतमहेश्वरम् ॥ ९-११ ॥ | *ma-ma  bhū-ta-ma-heś-va-ram* \|\| 9-11 \|\| |
| मोघाशा मोघकर्माणः | *mo-ghā-śā  mo-gha-kar-mā-ṇaḥ* |
| मोघज्ञाना विचेतसः । | *mo-gha-jñā-nā  vi-ce-ta-saḥ* \| |
| राक्षसीमासुरीं चैव | *rāk-ṣa-sīm-ā-su-rīṁ  cai-va* |
| प्रकृतिं मोहिनीं श्रिताः ॥ ९-१२ ॥ | *pra-kṛ-tiṁ  mo-hi-nīṁ  śri-tāḥ* \|\| 9-12 \|\| |
| महात्मानस्तु मां पार्थ | *ma-hāt-mā-nas-tu  māṁ  pār-tha* |
| दैवीं प्रकृतिमाश्रिताः । | *dai-vīṁ  pra-kṛ-tim-ā-śri-tāḥ* \| |
| भजन्त्यनन्यमनसः | *bha-jan-tya-nan-ya-ma-na-saḥ* |
| ज्ञात्वा भूतादिमव्ययम् ॥ ९-१३ ॥ | *jñāt-vā  bhū-tā-dim-av-ya-yam* \|\| 9-13 \|\| |

| | |
|---|---|
| सततं कीर्तयन्तो मां | *sa-ta-taṁ kīr-ta-yan-to māṁ* |
| यतन्तश्च दृढव्रताः । | *ya-tan-taś-ca dṛ-ḍha-vra-tāḥ* \| |
| नमस्यन्तश्च मां भक्त्या | *na-mas-yan-taś-ca māṁ bhak-tyā* |
| नित्ययुक्ता उपासते ॥ ९-१४ ॥ | *nit-ya-yuk-tā u-pā-sa-te* \|\| 9-14 \|\| |
| | |
| ज्ञानयज्ञेन चाप्यन्ये | *jñā-na-ya-jñe-na cāp-yan-ye* |
| यजन्तो मामुपासते । | *ya-jan-to mām-u-pā-sa-te* \| |
| एकत्वेन पृथक्त्वेन | *e-kat-ve-na pṛ-thak-tve-na* |
| बहुधा विश्वतोमुखम् ॥ ९-१५ ॥ | *ba-hu-dhā viś-va-to-mu-kham* \|\| 9-15 \|\| |
| | |
| अहं क्रतुरहं यज्ञः | *a-haṁ kra-tu-ra-haṁ ya-jñaḥ* |
| स्वधाहमहमौषधम् । | *sva-dhā-ham-a-ham-au-ṣa-dham* \| |
| मन्त्रोऽहमहमेवाज्यम् | *man-tro'-ham-a-ham-e-vāj-yam* |
| अहमग्निरहं हुतम् ॥ ९-१६ ॥ | *a-ham-ag-ni-ra-haṁ hu-tam* \|\| 9-16 \|\| |

| | |
|---|---|
| पिताहमस्य जगतः | *pi-tā-ham-as-ya ja-ga-taḥ* |
| माता धाता पितामहः। | *mā-tā dhā-tā pi-tā-ma-haḥ* \| |
| वेद्यं पवित्रमोङ्कारः | *ved-yaṁ pa-vi-tram-oṅ-kā-raḥ* |
| ऋक्साम यजुरेव च॥ ९-१७॥ | *ṛk-sā-ma ya-ju-re-va ca* \|\| 9-17 \|\| |



| | |
|---|---|
| ॐ तत्सत् | *om tat-sat* |
| इति श्रीमद्भगवद्गीतासु | *iti śrīmad-bhaga-vad-gī-tā-su* |
| उपनिषत्सु | *upa-ni-ṣat-su* |
| ब्रह्मविद्यायाम् | *brahma-vid-yā-yām* |
| योगशास्त्रे | *yoga-śās-tre* |
| श्रीकृष्णार्जुनसंवादे | *śrī-kṛṣ-ṇār-juna-saṁ-vā-de* |
| राजविद्याराजगुह्य योगो नाम | *rā-ja-vid-yā-rā-ja-guh-ya yo-go nā-ma* |
| नवमोऽध्यायः। | *na-va-mo-'dhyā-yaḥ* \| |
| ॐ हरिःॐ | *om hariḥ om* |
| श्री गुरुभ्यो नमः | *śrī guru-bhyo namaḥ* |
| हरिः ॐ | *hariḥ om* |

| | |
|---|---|
| सर्वधर्मान्परित्यज्य | *sar-va-dhar-mān-pari-tyaj-ya* |
| मामेकं शरणं व्रज। | *mām-ekaṁ śara-ṇaṁ vra-ja* \| |
| अहं त्वा सर्वपापेभ्यः | *ahaṁ tvā sar-va-pā-pebh-yaḥ* |
| मोक्षयिष्यामि मा शुचः॥ १८-६६ ॥ | *mokṣa-yiṣ-yā-mi mā śu-caḥ* \|\| 18-66 \|\| |

**श्री कृष्णार्पणमस्तु-** *śrī kṛṣ-ṇār-pa-ṇam-astu*